Volume : 4 | Issue : 12 | December 2015 ISSN - 2250-1991

Research Paper Sanskrit

# KALIDASASYA KAVYANATAKE PRAKRITIBARTA
# कालिदासस्य काव्यनाटके प्रकृतिवार्ता

**मधुमिता जाना**

अतिथिअध्यापकः संस्कृतविभागः विवेकानन्दः मिशन महाविद्यालयः चैतन्यपुरः (हलदिया) पूर्वमेदिनीपूरः पश्चिमवङ्गः

**ABSTRACT**

वर्तमानकाले परिवेशप्रसङ्गः सर्वत्र उद्घोष्यते । परिवेशसचेतनतायाः ब्यापकप्रसारत्बात् परिवेशविषये सर्वत्र सचेतनता दृश्यते । अनुरुपं सचेतनता महाकविकालिदासस्य काव्यनाटके वर्तते । विश्बमङ्गलकामिनः विश्बजनहिताय काब्यं निर्मान्ति । इयमेव रीतिः प्राचीनभारतीयसंस्कृतसाहित्ये प्रचलिता आसीत् । विशेषतः कालिदासीयसाहित्ये प्रकृतिप्रसङ्गः सर्वत्र जायते । आधुनिकपरिवेशप्रसङ्गे कालिदाससाहित्यस्य उपयोगिता न केनापि अपलपितुं शक्यते । अभिज्ञानशकुन्तले या कमनीयाप्रकृतिः शकुन्तलायाः मनसि शृङ्गारकरूणादिकं जनयति । कुमारसम्भवमहाकाव्ये हिमालयः पृथिव्याः मानदण्डः इव तिष्ठति । मेघदूतकाव्ये यक्षस्य वार्ता तस्य पत्नीं प्रेरयितुं मेघस्य दैत्यं स्वीकरोति । महाकविकालिदासेन अत्र विश्बवासिनां कल्याणाय विश्बे शान्तिस्थापनाय च प्रकृते विशालवैभवं विभिन्नचरित्रमाध्यमेन प्रदर्शितम् । कुमारसम्भवम् इति महाकाव्यस्य प्रकृतिवर्णनात्मकं मङ्गलाचरणे प्रकृतिवार्ता उद्घोष्यते । रघुवंशस्य मङ्गलाचरणे शिवपार्वत्योस्तुतिवाक्यं भवति, साधारणपाठकानां कृते सामान्यं स्तुतिवाक्यमिदं स्यात् । अतएव वागर्थौ शब्द ब्यवहारेण महाकवेः विश्बनिर्मातृनिर्मितेः स्तुतिः भवति । तस्य स्तुतिमाध्यमेन परमेश्बरस्य स्तुतिं करोति । यदा परमेशः सन्तुष्टो भवति तदा परिवेशस्य कल्याणं स्यात् । कुमारसम्भवस्य हिमालयवर्णनात्मकं मङ्गलाचरणे बिश्बस्रष्टुः विशालता वर्निता । कालिदासकृतस्य दृश्यश्रव्यकाव्येषु परिवेशवार्तायाः परिचयं दृश्यते । अत्र आशय़ोऽयं स्यात् संसारः शिवमय़ः, वयं सर्वे विश्बवासिनः शिवस्य अंशोद्भताः । अतएव वय़ं परिवेशसुरक्षायै यत्नशीलाः भवेम । विशुद्धपरिवेशेन सर्वे सर्वदा सुस्वास्थ्यप्रदजीवनं अतिवाहन्ति । अतः विश्ब्बवासिनः परिवेशसुरक्षार्थं यत्नशीलाः भबेयुः इति वार्ता कालिदासस्य काव्यनाटके प्रदर्शितम् ।

**KEYWORDS**

काव्यम्, नाटकम्, प्रकृतिः, अभिज्ञानशकुन्तलम्, कुमारसम्भवम्, रघुवंशम्, मेघदूतम्, मालविकाग्निमित्रम्, विक्रमोर्वशीय़म्, ऋतुसंहारम् ।

संस्कृतसाहित्याकाशे कविकुलगुरुकालिदासः देदीप्यमाननक्षत्रवत् अस्ति । महाकविकालिदासः संस्कृतकाव्यनाटके सर्वश्रेष्ठः अस्ति । तस्य स्थितिकालविषये मतानैक्यम् अस्ति । कविकुलगुरुकालिदासस्य स्थितिकालविषये अद्याबधि प्रकृतसत्यं ज्ञातुं पण्डिताः न शक्यते । कथितं हि -

"पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।
अद्यापि तत्तुल्यकवेरभावादणामिका सार्थवती बभूव ॥"

आनन्दवर्धनमम्मटविश्वनाथपण्डितराजप्रमुखाः काव्यस्य प्रय़ोजनं विचारप्रसङ्गे रसानन्दलाभस्य महत्त्वमुपस्थापय़न्त्येव । अनाय़ासेन चतुर्वर्गप्राप्तिः काव्यादेव सम्भवेत् न तु अन्यस्मात् इति उत्कलीय़ वरिष्ठालङ्कारिकः कविराजः विश्वनाथः सोदाहरणं स्वग्रन्थे विचारय़ति । कवेः रचणाय़ां कदापि स्वार्थचिन्तनप्रवृत्तिः न तिष्ठति । सर्वत्रापरस्यानन्दे आनन्दं, दुःखे च दुखं वर्नितमस्ति । वहुजनहिताय़ वहुजनसुखाय़ सदा काव्यानि विरच्यन्ते अथवा यस्मिन् साहित्ये तादृशी अम्लानधारा प्रवहति, तदा तत् साहित्यं सार्वकालिकं यशसे योग्यं भवति । अतः भारतीय़रचणाय़ां भगवद्गीता, पञ्चतन्त्रम् कालिदाससाहित्यं, भारविमाघश्रीहर्षादीनां च काव्यनाटकानि तथा विश्वसाहित्ये पाश्चात्यकवीनां सेक्सपीय़रकीथहार्वाटानां च काव्यनाटकानि अद्यावधि चिरहरित्प्रकृतितुल्यं सहृदय़ानां हृदय़े आनन्दं जनय़न्ति ।

कालिदासः संस्कृतकवीनामग्रणीः इति सन्ताः अभ्यूपगम्यन्ते । सत्यमेव च स भारतीय़शेक्सपीय़रः इत्याख्यायते । भारतीय़ाः पण्डिताः आलङ्कारिकाश्चैनं महाकविं कविशिरोमणिः, कविकुलगुरुप्रभृतिभिरुपपदैः स्मरन्ति । तस्य समय़े व्याकरणसाहित्यसूत्रादिषु धर्मशास्त्रदर्शनज्योतिषप्रभृतिषु च सर्वेषु शास्त्रेषु पण्डिताः आसन् । महाकाव्यगीतिकाव्यरुपकेति त्रिविधकाव्यस्य कर्ता कालिदासः आसीत् । कालिदासस्य नाम्ना वहवः ग्रन्थाः प्रचलिताः, तेषु सप्तग्रण्थाः तेन विरचिताः इति पण्डिताः मन्यन्ते । काव्यचतुष्टयं नाटकत्रयं च कालिदासरचितमिति -

१. कुमारसम्भवम्
२. रघुवंशम्
३. मेघदूतम्
४. ऋतुसहारम्
५. विक्रमोर्वशीय़म्
६. मालविकाग्निमित्रम्
७. अभिज्ञानशकुन्तलम्

मानवः प्रकृत्याः अङ्गभूताः अस्ति । तर्हि प्रकृत्याः हृदयेण सह मानवहृदयस्य अविच्छेद्यसम्पर्कमस्ति । प्रकृतिं उपेक्षणीया मानवस्य जीवनं असम्भवम् । कालक्रमेण जगतं परिवर्तणशीलम् । कालचक्रस्य परिवर्तनेणेन विश्बप्रकृत्याः रङ्गमञ्चे क्रमाण्वयेण ऋतवः आविर्भूताः भवन्ति । ऋतूणां आविर्भावेण मानवानां मनसि परिवर्तणं समुत्पाद्यन्ते । निदाघक्लिष्टप्रकृत्याः रुद्रमूर्तिः, वर्षासु गुरुगम्भीरमेघाः, शारदचन्द्रिकायाः स्निग्धस्पर्शः, शीतस्य सुशीतलः तुहिनः, वसन्तस्य पुष्पसमृद्धिः मानवानां जीवनेषु प्रभावं विस्तारयन्ति । कविक्रतुः कविचेतसि प्रकृत्याः प्रभावः अपरिसीमः । ग्रीष्मस्य दावदाहेन कवेः चेतसि यादृशः रागः सञ्जीवति तादृशः रागः दुरीभवति वर्षाणां शीतलस्पर्शेण । अपि च वसन्तऋतोर्स्पर्शे आनन्द जनयति ।प्रकृत्या सह मानवहृदयस्य अन्तरङ्गतास्थापने कवीनां कालिदासः श्रेष्ठः । कालिदासस्य अमरलेखन्यास्पर्शेण जड़प्रकृतिः तस्य काव्यनाटके चेतनरुपेण आविर्भूता भवति । महाकविकालिदासविरचितस्य रचणया सह परिचितं चेत् निःसंशयेन वोध्यते यत् - सः प्रकृत्याः कविः आसीत् । तस्याः रचनायामतुलनीया प्रकृतिचेतना मानवप्रकृतिश्च अनुपमसौहार्द अस्माकं हृदयं स्पर्शतः। कालिदासस्यकाले प्रकृत्या सह मानवस्य आन्तरिकयोगसूत्रं आसीत् । अधुनातनकालवत् परिवेशस्यविषये चिन्तनं स्बचेतनतां नासीत् । तर्हि असचेतनभावेन मानवप्रकृतिञ्च पारस्परिकसौहार्दपूर्णसम्पर्कं कालिदासस्य काव्यनाट्ये वर्णितम् ।

**कुमारसम्भवम् -**

वर्तमानजगति परिवेशस्य प्रसङ्गः सर्वत्र उद्घोष्यते । विश्वमङ्गलकामिनो सारस्वतसाधकाः विश्वजनहिताय़ काव्यं रचन्ति । इय़मेव रीतिः भारतीय़ प्राचीनसाहित्ये ख्रीष्टजन्मनः पूर्वं प्रचलिता आसीत् । विशेषतः कालिदासस्य काव्ये प्रकृतिप्रसङ्गः सूक्ष्मेविचारे सहृदय़ानां हृदय़कन्दरे महदानन्दं जनय़ेदिति । महाकविः कालिदासः सप्तदशसर्गैः 'कुमारसम्भवम्' इति काव्यं रचितवान् । हिमालयस्य विचित्राः धातवः मेघेन सह संयुक्तः रक्तिमानं सृजन्ति । कुमारसम्भवमहाकाव्यस्य प्रारम्भे हिमालय़स्य वर्णनां महाकवेलेखन्यां जीवन्तरुपेणवर्णितम् । हिमालय़स्य वर्णनावसरे, अपि च पार्वतीपरमेश्वरय़ोः महत्त्वं वर्णनावसरे प्रकृतिस्वरुपं प्रदर्शितम् । हिमालयस्यवर्णनावसरे कालिदासः प्रकृत्याः अपूर्वरूपवैचित्र्यं वर्णयति ।

"अस्ति उत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाहय
स्थितः पृथिव्या हव मानदण्डः ॥"

महाकाव्यस्य हिमालवर्णनावसरे विश्वस्रष्टुः विशालता, महनीयता च पाठकानां मनसि झटित्येव समागच्छति । स एव परमकारुनिकः हिमालयसमः विश्ववासिनां मङ्गलं तनोति । हिमालयस्य वर्णनावसरे महाकविना कालिदासः प्रकृत्याः अपूर्वचित्रं वर्णितम् । हिमालयः शान्तसंयतपरिवेशे योगीश्वरशङ्करः इव ध्यानासीन आसीत् । प्रकृतिः निष्पन्दभावेन तपोवनस्य शान्तिशृङ्खलां रक्षति । उमायाः जन्मस्थानं हिमालयस्य हृद्यवर्णनामाध्यमेन प्राकृत्या अपूर्ववर्णनां वर्णिता । असामान्यः अहङ्कारं नीत्बा पार्वती महेश्वरस्य चरणे उपस्थितवती, फलं तु विपरीतं संघटति। महेश्वरस्य रोषाग्णौ मदनदेवः भस्मीभूतासीत् । पार्वती स्वस्य रूपस्य धिक्कारं ददन्ती गृहं प्रत्यागतवती । विषादस्य मलिनछायायाम् आश्रमपरिवेशोऽपि मलिनी भवति ।

**रघुवंशम् -**

'रघुवंशम्' महाकाव्यस्य मङ्गलाचरणे शिवपार्वत्योः स्तुतिवाक्यं भवति साधारणपाठकानां कृते स्तुतिवाक्यमिदं स्यात् किन्तु भवद्‌बिधानां शास्त्रमथनवचनानां कृते तस्य वहप्रसारिणी मूर्तिः सततमुपास्या एव वाक् च अर्थश्च = वागर्थौ । वाक् नाम श्रवणेन्दियग्राह्यविषयः शव्दः, तदतिरिच्य सर्वे एव अर्थाः । अतएव महाकवेः उद्देश्यं भवति पदद्बयेन एव विश्वनिमातृनिर्मितेः स्तुतिः । रघुवंशे वागर्थरुपयोः उमामहेश्वरयोः, कुमारसम्भवे प्रकृतिपुरुषरुपिपृथिवी हिमालयछलेन पार्वतीपरमेश्वरयोः स्तुतिः कृताऽस्ति । महाकवि कालिदासः शिवस्य उपसकः आसीत् । अतः स तस्य काव्यस्य मङ्गलाचरने शिवस्य वन्दनां करोति । शैवगमानुरोचधनशिवः विश्वस्य स्रष्ठा, पालकः विनाशकश्च । कालिदासस्याशयः संसारः शिवमयः । वयं सर्वे विश्ववासिनः शिवस्य अंशोद्भूताः । अतः वयमपि प्रकृतिसुराक्षायैः यत्नशीलाः भवेम चेत् शिवस्य आशीर्वादात् सर्वदा विश्वे मङ्गलमेव स्यादिति ।

परमेश्वरस्य इदं जगत् निर्मितम् । मानवः कदापि परमेश्वरं द्रष्टुं सक्षमो न स्यात् । तस्य प्रभया स पश्यति । तस्य भाषा विश्वमिदं विभाति । परमेश्वरस्य स्तुतिं विरच्य तेन माध्यमेन तस्य स्तुतिं करोति । यदा परमेश्वरः सन्तुष्टो भवति तदा विश्वस्य कल्याणं स्यात् । अतः रघुवंशस्य मङ्गलाचरणे "सर्वे भवन्तु सुखिनः" इति वैदिकतत्त्वं निहितमस्ति । इन्दुमत्याः मृत्यौ अजविलापेन सर्वेपादपाः अश्रुमोचनं कुर्वन्ति । यदा विश्बामित्रेण सह रामलक्ष्मणौ वनपथि गच्छतः तदा प्रकृतिः विविधोपायेन सेवते - सरोवरः वारि ददाति, विहगाः संक्रीडन्ति, वायुः सुगन्धिः पुष्परेणुं वहति, मेघः शीतलछायां ददाति । सीताहरणात् परं यदा रामचन्द्रः उद्‌बिग्नं तदा लतादि पन्थानं दर्शयन्ति ।

रघुवंशमहाकाव्ये चित्रितनक्षत्रशोभितो गगनमण्डलम्, नीलसमुद्रः फुल्लकुसुमितद्रुमदलशोभिनीवनभूमिः अपूर्वरूपेण चित्रिताः । महाकाव्ये प्रकृतिः सुखदुःखभावेन मानवेन सह समभावयुक्ता । अकारणलोकापवादभयेण रामादेशेन परित्यक्त्वा सीतायाः रोदणेन तपोवनस्य वृक्षलतापशुविहगादि क्रन्दन्ति -

नृत्यं मयूराः कुसुमानि वृक्षाः दर्भानुपात्तान् विजहुर्हरिण्यः ।
तस्याः प्रपन्ये समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि ॥

मेघदूतम् -

'मेघदूतम्' इति गीतिकाव्ये वयं पश्यामः - यक्षः मेघं दौत्यकर्मणि नियुक्तं कृत्बा अलकायां प्रेरितवान् । मेघः अन्तरङ्गसुहृद्वत् यक्षस्य वार्ता सुदूरअलकायां वहति । पथि गृहस्थव्यक्तिवत् पर्वतः मेघं आप्यायणं करोति । एतेन प्रकृत्याः अन्तरङ्गतायाः चित्रं स्पष्टम् । धूमः, ज्योतिः, सलिलः, वायुः सन्निपातेन सृष्टः मेघः विशिष्टभूमिकां पालयति ।

**ऋतुसंहारहारम् -**

कालिदासप्रणीतं 'ऋतुसंहारम्' काब्यं षष्ठसर्गेण रचितम् । षड् ऋतूणां आविर्भावेण प्रकृत्या सह यत् परिवर्तनं सम्पादयति तस्य काव्यिकप्रकाशः महाकविः अपूर्वदक्षतायां वर्णनां करोति । ऋतुसंहारम् इति गीतिकाव्ये षट् ऋतूणां प्राकृतिकसैन्दर्यस्य परिवर्तणेन मनुष्याणां मनःसु यत् परिवर्तणं भवन्ति महाकविः अपूर्वदक्षतया प्रकाशयति । अपि तु ऋतुपरिवर्तणेन नायकनायिकानां हृदयवृत्तीनां परिवर्तणं दृश्यन्ते । श्लोकेऽस्मिन् वसन्तऋतोः वर्णनावसरे महाकविना उक्तम् -

" प्रफुल्लचूतांकुरतीक्ष्णसायको द्बिरेफमाला विलसद् धनुर्गुणः ।
मनांसि भेत्तुं सुरतप्रसङ्गिनां वसन्तयोधः समुपागतः प्रिये ॥"

ऋतुसंहारकाव्ये ऋतूणां आविर्भावेण मानवानां मनसि परिवर्तनं जायन्ते, पतिपत्नीप्रणयिनीनां मनःसु भावमूर्च्छनायाः काव्यिकप्रकाशं दृश्यते । अत्र प्रकृतिः केवलं उद्दीपनरुपेण चित्रिता नासीत्, आलम्वनरुपेण तस्य वर्णनां दृश्यते । षट् ऋतूणां प्राकृतिकसौन्दर्यस्य वर्णना मनुष्याणां मनसि तस्य प्रभावः सविस्तारं वर्णितम् । विशेषतः षट् ऋतूणां परिवर्तणेन नायकनायिकानां हृदयवृत्तीणां परिवर्तणं दृश्यते । प्रकृतिं प्रति गभीरानुरागः सूक्ष्मपर्यवेक्षणशक्तिश्च काव्यस्य सर्वत्र दृश्येते ।

काव्यवत् महाकवेः नाटकेषु प्रकृत्याः अन्तरङ्गतायाचित्रं स्पष्टम् -

**विक्रमोर्वशीयम् -**

संस्कृतकवीनां कालिदासः श्रेष्ठः । कालिदासस्य अमरलेखन्याः यादुस्पर्शेण जड़प्रकृतिः तस्य काव्यनाटके चेतनवती विराजते । रीडारमहोदयेण उक्तम् - प्रकृत्या सह मानवहृदस्य अन्तरङ्गतास्थापनेन कालिदासस्य प्रतिभायाः श्रेष्ठत्वं लभते । महाकविः कालिदासः प्रतिभासम्पन्नः कविः आसीत् । तस्य काव्यानां शैली सर्वेजः भिन्नः एवास्ति । प्रकृतिवर्ननानैपुन्ये स संस्कृतसाहित्ये प्रसिद्धोऽस्ति । तं विद्बांसः दीपशिखा इति वदान्ति ।

कालिदासस्य नाटकानां प्रकृत्या सह मानवस्य अन्तरङ्गतायाः चित्रं स्पष्टतया वर्णितम् । 'विक्रमोर्वशीयम्' इति नाटके उर्वश्याः अन्वेषणं प्रेमविह्वलराजा पुरुरवायाः विलापेन वृक्षलतादीनि संवेदनशीलानि अभवन् ।

**मालविकाग्निमित्रम् -**

'मालविकाग्निमित्रम्' इति नाटके महाकविः कमनीयकलेवरमालविकां प्रकृतिदेव्याः प्रतिमूर्तिरूपेण कल्पनां कृत्वा वर्णयति । अत्र उद्यानवाटिकायाः वृक्षविटपीनां सौन्दर्यं सन्दर्स्य अग्निमित्रस्य मनसि मालविकाप्राप्तिहेतुर्चिन्ता संजायते । कुसुमाकारस्य शोभा तत्र परिलक्षिता । सरसां नदीनाञ्च शोभा हृदये राज्ञा अनुभूता एतादृशे रमनीयमुहूर्ते मालविकां वीक्ष्य हरदत्तः, गणदासः नृत्यशिक्षकयोः नृत्यकलाकौशलं च मालविकास्मरणं अधिकतरतया विवर्धितम् । रमणीयनृत्यं रमणीयकालश्च उभे मालविकाअग्निमित्रयोर्मध्ये विमलानन्दं जनयति स्म ।

**अभिज्ञानशकुन्तलम् -**

नाटकेषु श्रेष्ठं 'अभिज्ञानशकुन्तलम्' नाटके अन्तरङ्गतायाः चित्रस्य चरमोत्कर्षतां लभते । नाटकस्य समग्रेअंशे प्रकृतेः प्रभावं विस्तारयति । मालिनीनद्यास्तीरे महर्षेः कण्वस्य आश्रमम् अस्ति । तत्र वृक्षलतापशुविहगादि सोदरस्नेहेन पालितानि । मातृहीनः मृगशिशुः शकुन्तलायाः स्नेहेन पालितः । महिषाणां जलाशये अवगाहनं, मृगाणां वृक्षछायायां रोमन्थनादिकर्म अरण्यस्य जीवकुलानां चित्रं प्रदर्शितम् । चतुर्थाङ्केपतिगृहयात्राकाले तपोवनस्य वृक्षादीनि शकुन्तलां विविधैः अलङ्कारैः सुसज्जितां कुर्वन्ति । कोकिलाः कुहरवेण शकुन्तलाविदायस्य अनुमोदनं ज्ञापयन्ति । शकुन्तला वियोगेण तपोवनभूम्यां विषादस्य सुरं प्रवहति । षष्ठाङ्केशकुनलाप्रत्याक्षानस्य परं राज्ञा सह प्रकृतिरपि समतां एति । समग्रे नाटके प्रकृत्याः सौन्दर्यवर्णनायां कालिदासस्य प्रकृतिप्रीतिः प्रकाशिता । विश्बश्रेष्ठअभिज्ञानशकुन्तलमिति नाटके अन्तरङ्गतायाः चित्रं सर्वोत्कृष्टं भवति । कालिदासस्य नाटकस्य आद्यन्तः विशेषतः चतुर्थाङ्केशकुन्तलायाः पतिगृहयात्राकाले प्रकृत्यावर्णनं सुचारुरूपेण वर्णितम् । शकुन्तलायाः अकृत्रिमं स्नेहेन तपोवनस्य वृक्षलतापशुपक्षिणः सयत्नं रक्षितावर्धिताश्च । अतः महाकविना उक्तम् -

"पातुं न प्रथमं व्यवस्यति जलं युष्माष्बपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्स्वः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥"

श्लोकेऽस्मिन् महाकवेः प्रकृतिप्रेमिकता प्रकृत्या सह मानवस्य अन्तरङ्गता च परं विकाशं समासादिता । शकुन्तलायाः तरुमूले जलसेचनं अभिसिञ्चनस्य नामान्तरम् । तरुणां जलसेचनं परं शकुन्तलायाः जलग्रहणं वृक्षादीनां प्रति अन्तरङ्गतायाः परिचायकः । दीर्घापाङ्गनामकमृगशिशोरवस्थावर्णनावसरे कालिदासेन उक्तम् -

"उद्‌गलितदर्भकवलामृग्यः परित्यक्तनर्तना मयुराः ।
अपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः ॥"

शकुन्तलावियोगात् न केवलं जीवाः, अपि तु लतावृक्षादीनि विरहविधुराणि ते अश्रुमोचनछलेन तेषां शुष्काणि पाण्डूपत्राणि मुञ्चन्ति । शकुन्तलायाः पतिगृहयात्राकाले समग्रतपोवनभूम्यां विषादस्य सूरं प्रवहति । वृक्षादीनि अश्रुविसर्जनस्य छलेन पाण्डुपत्राः मुञ्चन्ति । कोकिलाः कुहुरवेण शकुन्तकायाः विदाये सम्मतिं ज्ञापयन्ति ।

प्राचीनसंस्कृतसाहित्ये प्रकृत्याः अपरिहार्यं अंशग्रहणम् आसीत् । महाकविकालिदासस्य प्रकृतिवर्णनायां सर्वोत्तमाख्यातिः आसीत् । तस्य प्रकृतिवर्णनां दृष्ट्बा सहृद्यसुधियः तयि प्रसंसन्ति । महाकविकालिदासस्य दृष्ट्या प्रकृत्याः पृथकसत्त्वा आसीत् । पशुपक्षीवृक्षलतादीनि स्व स्व स्वभावान् रक्षित्वा मानवेन सह आत्मीयतासूत्रेण आवद्धानि । अतः अत्र अन्यान्यचरित्रवत् प्रकृत्या विशिष्टा भूमिका नोपेक्षनीया । “सर्वं खल्लिदं ब्रह्म” तत्त्वे विश्वस्तः कालिदासः एकमेव कविः, यस्य कल्पलोके प्रकृतिः सजीवचेतना, संवेदनशीला च । तर्हि तस्य काब्यनाटके प्रकृतिः मानवेन सह परस्परसमब्याथिरुपेण चित्रितम् । अतः महाकविकालिदासः प्रकृतिप्रेमिककविः, परिवेशमित्रकविः इत्यादि उपाधिना भूषितः । इत्यल्लं पल्लवितेन ।

## REFERENCES

१. संस्कृतसाहित्येतिहासः, आचार्यः रामचन्द्रमिश्रः, चौखाम्बा विद्याभवन, वाराणसी, २०१३ । | २. संस्कृतसाहित्येतिहासः, आचार्यः हंसराज अग्रवालः, चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१२ । | ३. संस्कृतसाहित्येतिहासः, डः देवकुमार दासः, श्रीवलराम प्रकाशनी, कलकाता, १४१२ वङ्गाब्द । | ४. कुमारसम्भवम्, राजीवः सिनहा, शुभमयः पाहाड़ी च, डाभ् पावलिशिं हाउस्, कलकाता, २०१५ । | ५. संस्कृतशास्त्रमञ्जुषा, डः उदयश्ङ्करः झा. चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१४ । | ६. कालिदासस्य रचनासमग्र, वसन्तः भट्टाचार्यः, सञ्चिता प्रकाशनी, कलकाता, २०१२ । | ७. संस्कृतसाहित्येतिहासः, युधिष्ठिरः गोपः, संस्कृतः वुकडिपो, कलकाता, २००७ । | ८. कुमारसम्भवम् महाकाव्यम्, श्री पं शेषराजशर्मा रेग्मी, चौखाम्वा संस्कृत संस्थान वाराणसी, २०११ । | ९. वि.ए. संस्कृत निर्देशिका, वनविहारी घोषालः, वुकस अयाण्ड टेकनोलजिस्, कलकाता, २०१३ । | १०. संस्कृत पास (प्रथम वर्ष), डः अन्नदाशङ्करः पाहाड़ी, माइति पावलिकेशन, मेदिनीपुर, २०१३। | ११. मेघदूत ओ सैदामिनि, सत्यनारायणः चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता, २००५ । | १२. अभिज्ञानशकुन्तलम्, डः अनिलः चन्द्र वसुः, संस्कृतः वुक डिपो, कलकाता, २००७ । | १३.अभिज्ञानशकुन्तलम्, श्री सत्यनारायणः चक्रवर्ति, संस्कृतः पुस्तक भाण्डार, कलकाता, २००४ । | १४. अभिज्ञानशकुन्तलम्, डः प्रणवः कुमार दत्तः, संस्कृतः वुक डिपो, कलकाता, २००६ । |